वि+अव+आच्छादने (ढाका) अपवारणे। "प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम्" रघुः। "व्यवदधाति दर्भपिञ्जूलानि" सांख्यब्रा० १८।८। "अन्तर्द्धा व्यवधा पुंसि अन्तर्द्धिरपवारणम्" अमरः। "उदयाचलव्यवहितेन्दुवपुः" माघः।

आ+आरोहे आरोपणे स्थापने च। स्वद्रव्यस्य ऋणशोधनकालपर्य्यन्तं धनिकसमीपे स्थापने आधिः आहितः। अग्न्यादेः संस्कारभेदे अग्न्याधानम्। "जनपदे न गदः पदमादधौ" रघुः। "आदध्यात् संभारान् दर्भान् दीर्घान् गर्भांश्च" छ० स० ४८। "गर्भमाधत्त राज्ञी" रघुः। "ज्येष्ठायां धर्मचारिण्यां महिष्यां गर्भमादधे" भा० व० २६२ अ०।

अति+आ+मर्य्यादातिक्रमेण धारणे। "कार्य्यमत्याहितं भविष्यति" प्रबोधच०। "यदि स्यादिह गोविन्दो नैवदत्याहितं भवेत्" हरिवं० १७१ अ०।

अनु+आ+पश्चादाधाने। यदेकस्य निहितं द्रव्यं तेनापि अनु पश्चादन्यस्य हस्ते स्वामिने देहीति समयेन समर्पणे च। अन्वाहितशब्दे दृश्यम्।

अभि+आ+साम्मुख्येन स्थापने "अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत्" मनुः।

उप+आ+धर्मचिन्तायाम् "उपाधिना धर्मचिन्ता" काम०। सामीप्येनाधाने अभ्युत्पाते मेदि०। "अभ्युत्पात उपाहितः" अमरः। संयोजने च अमरः। "तस्य निष्क उपाहित आस" शत० ब्रा० ११।४।१।१

निर्+आ+निराकरणे "यः क्रव्यादं निरादधत्" अथ० १२।२।३६।

परि+आ०परितः स्थापने। "कृत्वा कुम्भीमध्यग्नौ अयास्या सिक्तोदकमवपेद्धोनम्। पर्य्याधत्ताग्निना" अथ० ६।५।५

वि+आ+विशेषेणाधौ पीडायाम्। व्याधिः "यद्यात्मना प्रजया वा व्याधीयेत" श्रुतिः "एतद्वै परमं तपो यद्व्याहितस्तप्यते" शत०ब्रा०१४।८।११।१

सम्+आ+पूर्वमाचिप्तस्य दोषस्य निराकरणे "समाहितः समाधिस्तोप्युक्तसिद्धान्त आहित" मेदि० उक्तेः च सिद्धान्तोक्त्या दोषसमाधाने। सम्यक्चित्तस्य ईश्वरादौ संस्थापने समाधिः। "अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्" गीता। सम्यगारोपणे "सोऽहं भारं समाधास्ये त्वयि त्वं वोढुमर्हसि" भा० द्रो० ११ अ०। "तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः" रघुः।

आविस्+आविर्भवने प्रकाशने "आविर्हितस्तनुयुगं स हि सत्यवत्याम्" भाग० २।७।२।

उप+सामीप्येन स्थापने उपलक्षणतया स्थापने च। "क्रिया हि वस्तूपहिता प्रसीदति" रघुः। "एतदुपहितचैतन्यम्" वेदा०सा०। "यदिन्द्रियैरुपहितं पुरस्तात् प्राप्तान् सुखान् न स्मरते चिराय" भा० शा० ७४।१७ श्लो०। छलने स्वरूपप्रच्छादने उपधयश्छद्मकैतवमित्यमरोक्तेः।

तिरस्+अन्तर्द्धाने प्रच्छादने। "इति वाहृत्य विबुधान् विश्वयोनिस्तिरोदधे" कुमा०।

नि+स्थापने अज्ञातस्वामिकतया द्रव्यस्य स्थितौ स्थापने च "अनिधायैव तद्द्रव्यमाचक्षाणः शुचितामियात्" मनुः। "शिरसि निदधानोऽञ्जलिपुटम्" सा०द०। "अलं प्रयत्नेन धातलं मा निधाः पदं पदव्यां सगरस्य सन्ततेः" रघुः। "यस्तु पश्येन्निधिं राजा पुराणं निहितं चितौ" मनुः।

प्र+नि+ऐकाग्र्येण मनसः स्थापने। "ईश्वरप्रणिधानाद्वा" पात०सू०। "प्रणिधानं भक्तिविशेषः" भा०। प्रेरणे च "नीविं प्रति प्रणिहिते तु करे प्रियेण" सा० द०। मनोऽभिवेशने च "किष्किन्ध्याद्रिगुहां गन्तुं मनः प्रणिदधे द्रुतम्" भट्टिः।

प्रति+नि+तुल्यरूपतया करणादौ प्रतिनिधिः। "द्रव्येऽविद्यमाने यत् सामान्यतमं मन्येत तत्प्रतिनिदध्यात्" का० श्रौ० ३।२०।६ प्रतिनिधिशब्दे दृश्यम्।

सम्+नि+सम्यग्निधाने। "मेघेष्वर्के सन्निधत्ते प्राणानां पवनः पतिः। तच्च मेघगतं वारि शक्रो वर्षति भारत।" भा० अनु० ६त०। "दूरादाहृत्य सन्निधः संनिदध्याद्विहायसि" मनुः। नैकट्येन सम्बन्धे "समवेशं न कुर्वीत नोच्चैः सन्निहितो हसेत्" भा० वि० ४ अ०। "गुरौ गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्" मनुः। "अस्मिन् लतामण्डपे सन्निहितया त्वया भाव्यम्" शकु०। "भगवान् हरिरद्यापि तत्प्रत्नानां द्विजजननां वात्सल्येन सन्निधाप्यत दृच्छ्यारूपेण" भाग० ५।७।८। नैकट्येन स्थापने तु सक०। "स चाहं सहसख्या धनमित्रेण तत्र संन्यधिषि" दशकुमा०।

परि+वेष्टने आच्छादने। "यं परिधिं पर्य्यधात्" यजु० २।१७। "येनेन्द्रस्य इहस्पतिर्वासः पर्य्यधात्" पञ्चभो० ३।२ "वासस्य परिधानैकम्" भा० वि० ६ अ०। "परिहिते प्रातरनुवाके" आ० श्रौ० ६।६।१। "दृष्टिं परिदधे कृष्णो रौहिणेये च दारुणाम्" हरिवं० ७१ अ०।